## गुणोऽपृक्ते । (९१/२४४८)

[1]ऊर्णोते[2]र्धातोः अपृक्ते हलि पिति सार्वधातुके गुणो भवति । प्रोर्णोत् । प्रोर्णोः । हलि इति वर्तमाने यदपृक्तग्रहणं [3]क्रियते, [4]तेनैव ज्ञाप्यते भवत्येषा परिभाषा 'यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प. १२७) इति ॥

## तृणह इम् । (९२/२५४७)

तृणह इत्येतस्याङ्गस्य इमागमो भवति हलि पिति सार्वधातुके[5] । तृणेढि । तृणेक्षि । तृणेह्मि । अतृणेट् । वर्णाश्रयेऽपि [6]अत्र प्रत्ययलक्षणमिष्यते । हलि [7]इति किम् ? तृणहानि । पिति इत्येव, तृण्ढः । तृणह इति आगतश्नम्को गृह्यते, श्नमि कृते इमागमो यथा स्यात् इति ॥

## ब्रुव ईट् । (९३/२४५२)

ब्रू इत्येतस्मादुत्तरस्य हलादेः [8]पितः सार्वधातुकस्य ईडागमो भवति । ब्रवीति । ब्रवीषि । ब्रवीमि । [9]अब्रवीत् । हलि इत्येव, [10]ब्रवाणि । पिति इत्येव, ब्रूतः ॥

## यङो वा । (९४/२६५१)

यङः उत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति वा । शाकुनिको लालपीति । दुन्दुभिर्वावदीति । 'त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश' (ऋ. ४.५८.३) । न च भवति । वर्वर्ति, चर्कर्ति चक्रम् । हलादेः पितः सार्वधातुकस्य यङन्तादभावः इति यङ्लुगन्तस्य [11]उदाहरणम् ॥

## तुरुस्तुशम्यमः सार्वधातुके । (९५/२४४४)

[12]तु इति सौत्रोऽयं धातुः, 'रु शब्दे' (धा.पा. १०३५), 'ष्टुञ् स्तुतौ' (धा.पा. १०४४), 'शमु उपशमे' (धा.पा. १२०२), 'अम गत्यादिषु' (धा.पा. ४६५) इत्येतेभ्यः [13]परस्य सार्वधातुकस्य [14]हलादेर्वा ईडागमो भवति । उत्तौति, उत्तवीति । [15]उपरौति, उपरवीति । उपस्तौति, उपस्तवीति । शाम्यध्वम्, शमीध्वम् । अभ्यमति, अभ्यमीति । शम्यमोः '[16]बहुलं छन्दसि' (२.४.७३/३४००) इति विकरणलुकि सति हलादिसार्वधातुकमनन्तरं [17]सम्भवति । आपिशलाः 'तुरुस्तुशम्यमः [18]सार्वधातुकासुच्छन्दसि' इति पठन्ति । तत्र सर्वेषामेव छन्दसि विषये विधिरयं [19]भवति । सार्वधातुके इति अनुवर्तमाने पुनः सार्वधातुकग्रहणमपिदर्थम्, [20]स्तुवीत, शमीध्वम् इत्यत्रापि यथा स्यात् इति ॥

---

1. विभाषा इति निवृत्तम् इत्यधिकम् क. 2. धातोः नास्ति इ, अङ्गस्य इत्यधिकम् क. 3. करोति ह. 4. तेन ह. 5. परतः इत्यधिकम् क. 6. प्रत्ययलोपलक्षणम् क, प्रत्ययलक्षणपरिभाषा इ. 7. इत्येव क. 8. पिति सार्वधातुके परतः क. 9. अब्रवीत् नास्ति इ. 10. प्रब्रवाणि ब. 11. ग्रहणम् क.इ.ह. 12. वाक्यमिदं नास्ति इ. 13. परस्य नास्ति इ. 14. हलादौ क. 15. विरौति क, अपरौति, अपरवीति ब. 16. बहुलं नास्ति क. 17. भवति क. 18. सार्वधातुके छन्दसि इ. 19. भवति नास्ति ब. 20. स्तुवीत नास्ति क.